|| মহা নারায়ণোপনিষত ||

|| হরিঃ ওং ||

সহস্র শীর্ষং দেবং বিশ্বাক্ষং বিশ্বশংভুবং |
বিশ্বং নারায়ণং দেবমক্ষরং পরমং পদং ||
বিশ্বতঃ পরমান্নিত্যং বিশ্বং নারায়ণগং হরিম |
বিশ্বমেবেদং পুরুষস্তদ্বিশ্বমুপজীবতি ||
পতিং বিশ্বস্যাত্মেশ্বরগং     শাশ্বতগং শিবমচ্যুতং |
নারায়ণং মহাজ্ঞেয়ং বিশ্বাত্মানং পরায়ণম ||
নারায়ণ পরোজ্যোতি রাত্মা নারায়ণঃ পরঃ |
নারায়ণ পরংব্রহ্মতত্ত্ব নারায়ণঃ পরঃ ||
নারায়ণ পরো ধ্যাতা ধ্যানং নারায়ণঃ পরঃ |
য়চ্চকিংচি জ্জগত সর্বং দৃশ্যতে শ্রূয়তে পি বা ||
অংতর্বহিশ্চতৎসর্বং ব্যাপ্য নারায়ণঃ স্থিতঃ |
অনংতমব্যয়ং কবিগং সমুদ্রেংতং বিশ্বশংভুবম ||
পদ্মকোশ প্রতীকাশগং হৃদয়ং চাপ্যধোমুখম |
অধো নিষ্ট্যাবিতস্ত্যাংতে নাভ্যামুপরি তির্ষ্ঠতি ||
জ্বালমালাকুলং ভাতি বিশ্বস্যায়তনং মহত |
সংততগং শিলাভিস্তু লংবত্যাকোশসন্নিভং ||
তস্যান্তে সুষিরগং     সূক্ষ্মং তস্মিন সর্বং প্রতির্ষ্ঠিতম |
তস্য মধ্যে মহানগ্নির্বিশ্বার্চির্বিশ্বতোমুখঃ ||
সোগ্রভুগ বিভজংতিষ্ঠন্নাহারমজরঃ কবিঃ |
তির্য়গূর্ধ্ব মধশ্যায়ী রশ্ময় স্তস্য সংততাঃ ||
সংতাপয়তি স্বংদেহমাপাদ তলমস্তকঃ |
তস্য মধ্যে বহ্নিশিখা অণীয়োর্ধ্বা ব্যবস্থিতঃ ||

নীলতোয়দমধ্যস্থাদ্বিদ্যুল্লেখেব ভাস্বরা |
নীবারশূকবত্তন্বী পীতা ভাস্বত্যণূপমা ||
তস্যাশ্শিখায়া মধ্যে পরমাত্মাব্যবস্থিতঃ |
স ব্রহ্ম স শিবস্সহরিস্সেংদ্রস্সোক্ষরঃ পরমঃ স্বরাট ||
ওং তদ্ব্রহ্ম | ওং তদ্বায়ুঃ | ওং তদাত্মা | ওং তৎসত্যং | ওং তৎসর্বং |
ওং তৎপুরোর্নমঃ | অংতশ্চরতি ভূতেষু গুহায়াং বিশ্ব মূর্তিষু |
ত্বং য়জ্ঞস্ত্বংবষট্কারস্ত্বমিংদ্রস্ত্বগংরুদ্রস্ত্বংবিষ্ণুস্ত্বং ব্রহ্ম ত্বং প্রজাপতিঃ |
ত্বং তদাপ আপোজ্যোতীরসোমৃতং ব্রহ্মভূর্ভুবঃসুবরোং ||
( ঋতগং সত্যং পরং ব্রহ্মপুরুষং কৃষ্ণপিংগলম |
ঊর্ধ্বরেতং বিরূপাক্ষং বিশ্বরূপায় বৈ নমো নমঃ || )
ওং নারায়ণয় বিদ্মহে বাসুদেবায় ধীমহি |
তন্নো বিষ্ণুঃ প্রচোদয়াত ||
|| শ্রীকৃষ্ণার্পণমস্তু